শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রী রঙ্গনাথদিব্যমণিপাদুকাভ্যাং নমঃ

শ্রীকবিতার্কিকসিংহস্য সর্বতন্ত্রস্বতন্ত্রস্য
শ্রীমদ্বেঙ্কটনাথস্য বেদান্তাচার্যস্য কৃতিষু
শ্রীরঙ্গনাথপাদুকাসহস্রে

# ॥ দ্বন্দ্বপদ্ধতিঃ চতুর্বিংশী ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রী রঙ্গনাথদিব্যমণিপাদুকাভ্যাং নমঃ

# ॥ দ্বন্দ্বপদ্ধতিঃ চতুর্বিংশী ॥

শ্রীমান্ বেঙ্কটনাথার্যঃ কবিতার্কিককেসরী।
বেদান্তাচার্যবর্যো মে সন্নিধত্তাং সদা হৃদি ॥

প্রপদ্যে পাদুকারূপং
    প্রণবস্য কলাদ্বযম্।
ওতং মিতমিদং যস্মিন্
    অনন্তস্যাপি তৎপদম্ ॥ **24.1** ॥

মণিপাদুকযোর্যুগং মুরারেঃ
    মম নিত্যং বিদধাতু মঙ্গলানি।
অধিকৃত্য চরাচরস্য রক্ষাম্
    অনুকম্পাক্ষমযোরিবাবতারঃ ॥ **24.2** ॥

চরণৌ মণিপাদুকে ! মুরারেঃ
    প্রণতান্ পালযিতুং প্রপদ্যমানম্।
বিপদামিহ দৈবমানুষীণাং
    প্রতিকারং যুবযোর্দ্বযং প্রতীমঃ ॥ **24.3** ॥

মুরভিন্মণিপাদুকে ! ভবত্যোঃ
    বিহিতো নূনমসৌ মিথো বিভাগঃ।
ভজতামপরস্পরপ্রিযাণাম্
    অবিরোধায সুরাসুরেশ্বরাণাম্ ॥ **24.4** ॥

অহিতোন্মথনায সংশ্রিতানাম্
    অলমালোকৱশেন শব্দতো ৱা।
করযোশ্চ রথাঙ্গপাঞ্চজন্যৌ
    মধুহন্তুঃ পদযোশ্চ পাদুকে যে॥ **24.5**॥

অৱধীরিতসাধুপদ্ধতীনাম্
    অলসানাং মধুৱৈরিপাদুকে দ্বে।
ইতরেতরসাহচর্যমিত্থং
    প্রতিপন্নে ইৱ দৈৱপৌরুষে নঃ॥ **24.6**॥

পার্শ্ৱযোঃ সরসিজাৱসুন্দরে
    পাদযোশ্চ মণিপাদুকে ! যুৱাম্।
সন্নিকর্ষথ ন চেন্মধুদ্বিষঃ
    কিং করিষ্যতি কৃতাগসাং গণঃ॥ **24.7**॥

পাদুকে ! ভৱভযপ্রতীপযোঃ
    ভাৱযামি যুৱযোঃ সমাগমম্।
সক্তযোর্দনুজৱৈরিণঃ পদে
    ৱিদ্যযোরিৱ পরাৱরাত্মনোঃ॥ **24.8**॥

রঙ্গসীমনি রথাঙ্গলক্ষ্মণঃ
    চিন্তযামি তপনীযপাদুকে !।
শাপদোষশমনায তৎপদে
    চক্রৱাকমিথুনং কৃতাস্পদম্॥ **24.9**॥

মানযামি জগতস্তমোপহে
    মাধৱস্য মণিপাদুকে ! যুৱাম্।
দক্ষিণোত্তরগতিক্রমোচিতে
    পদ্ধতী ইৱ মযূখমালিনঃ॥ **24.10**॥

রঙ্গনাথপদযোরলঙ্ক্রিযা
    রাজতে কনকপাদুকাদ্ৱযী।
তদ্বিভূতিযুগলীৱ তাদৃশী
    ছন্দতঃ সমৱিভাগমাশ্রিতা॥ **24.11** ॥

সাক্ষাৎপদং মধুভিদঃ প্রতিপাদযন্ত্যৌ
    মানোপপত্তিনিযতে মণিপাদুকে দ্বে।
অন্যোন্যসঙ্গতিৱশাদুপপন্নচর্যাম্
    আজ্ঞাং শ্রুতিস্মৃতিমযীমৱধারযামি॥ **24.12** ॥

ৱিশ্বোপকারমধিকৃত্য ৱিহারকালে -
    ষ্ৱন্যোন্যতঃ প্রথমমেৱ পরিস্ফুরন্ত্যোঃ।
দৃষ্টান্তযন্তি যুৱযোর্মণিপাদরক্ষে !
    দিৱ্যং তদেৱ মিথুনং দিৱিষন্নিষেৱ্যম্॥ **24.13** ॥

দ্বারেৱ যত্র চরণৌ পরমস্য পুংসঃ
    তত্র দ্বিধা স্থিতৱতী মণিপাদুকে ! ৎৱম্।
যত্রৈৱ দর্শযতি দেৱি ! সহস্রপাত্ত্বং
    তত্রাপি নূনমসি দর্শিততাৱদাত্মা॥ **24.14** ॥

পর্যাযতো গতিৱশান্মণিপাদরক্ষে !
    পূর্ৱাপরৎৱনিযমং ৱ্যতিৱর্তযন্ত্যৌ।
মন্যে যুৱাং মহতি ৱিষ্ণুপদে স্ফুরন্ত্যৌ
    সন্ধ্যে সমস্তজগতামভিৱন্দনীযে॥ **24.15** ॥

অশ্রান্তসঞ্চরণযোর্নিজসম্প্রযোগাৎ
    অম্লানতাং চরণপঙ্কজযোর্দিশন্ত্যৌ।
মান্যে যুৱাং রঘুপতের্মণিপাদরক্ষে !
    ৱিদ্যে বলামতিবলাং চ ৱিচিন্তযামি॥ **24.16** ॥

অন্তর্মোহাদৱিদিতৱতামাত্মতত্ত্বং যথাৱৎ
   পদ্যামিত্থং পরিচিতৱতাং পাদুকে ! পাপলোক্যাম্।
নিত্যং ভক্তেরনুগুণতযা নাথ পাদং ভজন্ত্যৌ
   নিষ্ঠে সাক্ষাৎ স্ৱযমিহ যুৱাং জ্ঞানকর্মাত্মিকে নঃ ॥ **24.17** ॥

ন্যস্তং ৱিষ্ণোঃ পদমিহ মহৎ স্ৱেন ভূম্না ৱহন্ত্যোঃ
   আম্নাযাখ্যামৱিহতগতিং ৱর্তযন্ত্যোর্নিজাজ্ঞাম্।
আসন্নানাং প্রণযপদৱীমাত্মনা পূরযন্ত্যোঃ
   দ্বৈরাজ্যশ্রীর্ভৱতি জগতামৈকরাজ্যে ভৱত্যোঃ ॥ **24.18** ॥

অপ্রাপ্তানামুপজনযথঃ সম্পদাং প্রাপ্তিমেৱং
   সম্প্রাপ্তানাং স্ৱযমিহ পুনঃ পালনার্থং যতেথে।
সাক্ষাদ্রঙ্গক্ষিতিপতিপদং পাদুকে ! সাধযন্ত্যৌ
   যোগক্ষেমৌ সুচরিতৱশান্মূর্তিমন্তৌ যুৱাং নঃ ॥ **24.19** ॥

বদ্ধহরিপাদযুগলং
   যুগলং তপনীযপাদুকে ! যুৱযোঃ।
মোচযতি সংশ্রিতানাং
   পুণ্যাপুণ্যমযশৃঙ্খলাযুগলম্ ॥ **24.20** ॥

॥ ইতি শ্রীকৱিতার্কিকসিংহস্য সর্ৱতন্ত্রস্ৱতন্ত্রস্য
শ্রীমদ্বেঙ্কটনাথস্য ৱেদান্তাচার্যস্য কৃতিষু
শ্রীরঙ্গনাথপাদুকাসহস্রে দ্বন্দ্বপদ্ধতিঃ চতুর্ৱিংশী ॥

কৱিতার্কিকসিংহায কল্যাণগুণশালিনে।
শ্রীমতে ৱেঙ্কটেশায ৱেদান্তগুরৱে নমঃ ॥